२८ मयोः परस्परहतौ षण्णवतिर्भेदाः॥ विषमयोरप्येकपूर्वं चतुर्विंशतिः परस्परहतौ संख्या त्रिपंचाश
ल्लक्षाः। अष्टौ सहस्राः चत्वारि शतानि षोडश च। अंकतोपि ५३०८४१६॥ अत्रायुग्मे यस्यां तसाऽयुग्म
विपुलेति अकारप्रश्लेषेणापि कश्चिद्व्याचष्टे। पादद्व्यत्ययं चोदाहरणे आहुः विपरीतपथ्या चपला च।
क्रमात्। पथ्यां चैवं भेदस्त्वजगणनगणाभ्यां समसमस्थलघुतां तु भताभ्यां मपितस्यात पातव्यमिति। उदाहरणं
च समसमस्थलघुत्वमात्रतात्पर्येण जगणाभावेनोक्तमिति चाहुः। सैतवस्याखिलेष्वपीति। सैतव
स्याचार्यस्य मतेः खिलेष्वपि पादेषु समसमो लस्यादिति मत इत्यध्याहारेण समसमो ल इति पदानुषंगेण
च व्याख्येयं। संज्ञा तु विपुलेति निरूपपदैवा अत्र प्रतिपादं षण्णवतिर्भेदाः। तेषां परस्परहतौ संख्या अष्टकोट
यः कोनपंचाशल्लक्षाः चतुस्त्रिंशत्सहस्राणि षट्शती षट्पंचाशच्च अंकतोपि ८४९३४६५६ भेनाश्रितो
भाद्विपुलेति। आश्रितस्त्वतु पर्यासरेण भेन भगणेन भाद्वेत्यपर्यासरा विपुला भविपुलेत्यर्थः॥ के एम०
चिदन्याखिलेष्वपीत्यनुवर्त्तयंति। वृत्तिकृत्तरस्त्कभौ तौ चेति सूत्रे सैतवत ४ सैतवस्येति निवर्त्तंतं चपलायुजा २८

नित्यस्मादयुग्मग्रहणमनुवर्त्तत इति यदतो विषमपाद एव भविपुलाद्याह स्लाकुः ॥ इयमनन्यारश्चतुर्थात इति
चतुर्थाक्षरात्स्मादयुग्मग्रहणमनुवर्त्तत इति वदंतो विषमपादे विषपाद एव भविपुलाद्याह स्लाकुः ॥ इय
मन्याररश्चतुर्थात इति चतुर्थाक्षरात्परतश्चेद्गणास्तदे यममन्यथा भाद्विपुलान घाराद्विपुलार विपुले
सर्पे ॥ नोवृधेश्चेन्नविपुलेम्ति ॥ अवृधेश्चतुर्थान्नोन गणाश्चेत्तदा न विपुला ॥ तोब्धेस्तत्स्वर्बाम्मा भवद्विति
श्चाब्धेश्चतुर्थात्परस्तगणश्चेत्तदा तत्पूर्वतिकार पूर्वाम्मा विपुला तद्विपुलेत्यपर्पः ॥ एवं मयाभ्यांतत्पूर्व्वेवि
पुले भवतः ॥ अत्रैतासु चतुर्षु पादेष्वतुक्षपितत्तद्गणयोगस्य पेसतम्ब माहुस्तेषामतेनयन्नेकस्मिन्द्वयोर्वा न
तद्गणयोगस्तत्रैतासां परस्परं संसर्गेणान्ये भेदाज्ञेयाः ॥ वृत्तिकृन्मते तु विषमपादयोरेतद्गणयोगः ॥ अन
योस्त्वसममस्पत्न घुत्वमात्रयत्रचतुर्ष्वपि पादेषु भाद्वियोगस्तस्यानुष्टुप्त्वंमेव न तु वक्त्रमिति विवेकः ॥
तत्राप्युपकाद्दस्य जातिपरत्वेद्वयोरप्युपयुज्जो भगणादियोगः ॥ व्यक्तिपरत्वेत्वस्मत्स्वांगीकारेणापि लक्षण
र्षसिद्धेराघेतली येवा भगणादियोगः ॥ जातिपक्षे भविपुलोदाहरणं ॥ इयं तरखे चद्रमुखी स्मिनत्स्मोत्स्ना

चमानिनी। इंदीवराक्षी। हृदयंदहति। तिनपापिमश्राघेमविपुलोदाहरणं। उत्तिष्ठमानस्तुपरोनोपेक्ष्यः पथ्यमि
२९ च्छता। तमोन्हि शिष्टैराम्नातोवर्शपंत्तावामयः सच। तृतीयीश्रोधमसत्कुं इत्थंश्रोतपद्मरागदर्जालिषा। त्सलो
त्तरासंगरुचंविरधत्स्नूलपल्लवीमृरेकुविपुलायाः क्रमेणोदाहरणानि। सकारनानारकासकायसादृ
सायका। रसाद्वाहसारनादवादरवाद्दना। महाकविंकालिदासंवंदेवाग्देवतागुरुं। चतत्त्राने विम्बमाभा। तिदृ
र्पणेप्रतिविंबता। कामिनीभिः सहप्रीतिः कस्मैनामनरोचते। पदिनस्याह्वारिवीचीचंचतंहंतजीवितं। नवि
पुलोदाहरणानि क्रमेण। पुपुत्सुनेवक्रवचंकिमामुक्त। मिदंत्वया। तपस्विनोहिवसनेकेचजाजिनवल्कले।
अपानापाः प्रकृतयोमातवधुंनिवासितं। मौलैरानपयामासुर्भरतंस्तंभिताश्रुभिः ४। तवमंत्रकृतोमंत्रैर्दू
रात्संशमितारिभिः ४। प्रत्यादिश्यंतरवमेदघलक्ष्यभिदः शराः। तविपुलोदाहरणानि। सावैदुष्येप्रौढिर्यादिसं
र्वशास्त्रानुगामिनी। साभूरताश्रेष्ठापदिसर्वशास्त्रानुगामिनी। वैदेगुरुंरामेश्वरं सर्वशास्त्रविशारदं। वि राम०
स्मेराः कंप्रशिरसोपस्योक्तौपंडिताः परे। लोकवत्प्रतिपत्तव्योलौकिकोर्थः परीक्षकैः। लोकव्यवहाररंप्र २९

तिसदृशो बालपण्डितो। भविपुलोदाहरणानि। सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्यतः। स्याताममित्रौ
मित्रे च सहजप्राकृतावपि। यियक्षमाणेनाहूतः पार्थेन। पद्विषन्मुरं। अभिचैद्यप्रतिष्ठासुरासीत्कार्य
द्वयाकुलः। षड्गुणाः शक्तयस्तिस्रः सिद्धयश्चोदयास्त्रयः। पपानधीत्य व्याकर्तुमिति दुर्मेधसोप्यलं। पवि
पुलोदाहरणानि। ततः कुमुदनाथेन कामिनीगंडपांडुना। नेत्रानंदेन चंद्रेण माहेंद्री दिगलंकृता। नपुंसक
मिति ज्ञात्वा प्रियात्वा प्रियायै प्रेषितं मनः। तच्चिरं तत्र रमते हताः पाणिनिना वयं। तेषामपि पुनश्चाप्यचिन्ते
गुरुश्चिन्त्ये षगौरवं। तत्प्रयोजककर्तृत्वमुपैति मम जल्पता॥ एवं जविपुलाप्युदाहार्या। तत्र तु समपादयो
श्चतु--- जगणोपथ्यावक्त्रं। तन्मस्य लघुतामात्रेण जविपुलात्वमिति विवेकः। सविपुला तु क्वचि
त्प्रयोगाभावान्नास्ति अस्मेषामनुमते पुनस्तुनेवेत्यादौ नाविषमयो अपलादित्वाकृमयोल्कप- त्वाच्च पलो
पथ्यावक्त्रा। --- भवंति रपावपुपथ्येत्यादसंज्ञा ह्येवाः। -- इति तन्मते सर्वा- भविपुलादिषु वि
षमपादयोः प्रत्येकं चतुर्विंशतिर्भेदाः समयोः प्रत्येकं षण्णवतिः। परस्परहतौ तु युग्मविपुलावृत्तं।

ख्यातेयं॥ अत्र मते तु मुख्यैव वक्त्रवक्त्रं ख्या॥ तथा तं क्षीणगिरणतायां संक्षीणविपुलावक्त्रं भवति। भारवेः ह्व
३० चित्काले प्रसरता क्वचिदापत्य निवृत्ता॥ पुनेव सारंगकुलं जयाभिन्नं द्विषां कुलं कुमारो यद्घ्र ज्ञोरणजगतं
वयमारोपितास्त्वया॥ मनोरथस्याप्यपथं मनो विषयमात्मनः॥ माघे॥ भवद्भिरामवसरप्रदानाय वचांसि नः
पूर्वरंगः प्रसंगाय नाटकीयस्य वस्तुनः॥ इत्यादयो विपुलाभेदा अनेनात्र वक्त्रविप्रयोगेषु दृष्टव्याः। सर्वेषु
तु प्रायेण चतुर्थवर्णस्य गुरुतेति सांप्रदायिकाः॥ ॥इति श्रीनारायणभट्टविरचितायां वृत्तरत्नाकर
टीकायां वक्त्रप्रकरणं॥ ॥अथ मात्रासमामाह॥ द्विगुणितवसुलघुरचलधृतिरिति चेति। वर्णछंदो वृ॰
प्येतद्द्विगुणितवसुपदस्योत्तरत्रानुवृत्तिसिद्ध्यर्थं प्रकीर्णकेष्वप्यधायि। तेन मात्रासमकादिषु षोडश
मात्रत्वमधिकृतं भवति। द्विगुणा वसुलघवो षोडश लघवो यस्यां सा चलधृतिरिति कथ्यते चकारात् सा
र्वस्यापि संज्ञा भवति इति पिंगलमतसंग्रहः॥ षोडशलघुपादेत्यर्थः मात्रासमकं नवमो ल्गान्तमिति। पत्र भा॰
पादे नवमो लघुरेव गुरुश्चान्ते नियतस्तन्मात्रासमकसंज्ञं। नवमीत्यन्योर्लघुगुरु नियमात् शेषे नियमा। ३०

भावः सूचितः ४। सर्वेषां षोडशमात्रताकार्येति भावः ४। सर्वेषु मात्रासमेषु सममात्रापरमात्रया प्रुक्तानकार्ये
स्यपि संप्रदायः। तत्रश्च प्रथमे जगणाभावाच्चत्वारो गणा विकल्प्याः। यथा ऽऽ१।।ऽ२।।३।। ।।४ द्वितीयेत्र यः।
ऽऽ१।।ऽ२२ऽ।।३ मध्यगुरुः सर्वलघुगणौ विश्लोकस्य षष्ठत्वान्न भवतः। तृतीय एकः।।ऽ नवमोऽलिति वचना
दादिगुरुः सर्वगुरुश्च न भवतः।। मध्यगुरुः सर्वलघू तु पानवासि कालक्षणस्य षष्ठत्वान्न भवतः। चतुर्थे द्वौ भेदौ
ऽऽ१।।ऽ२ गंतत्वाभिधानादन्ये गणा न भवंति। एतेषां विकल्पानां मध्ये पवात्प्रतिचरणं चतुर्विंशति भे
दाः। चतुर्णां चतुर्विंशत्यकानी मन्योन्यहतौ वृक्षवदेव जाता तासंख्यालक्षणं पंचकत्रिंशत्सहस्राष्टष्टसप्तस
प्तिकसप्तशती चेति। बोध्याव पांबुधेर्विश्लोकरति। अथ पद्यस्य पवेस्य र्पे। अंबुधेः कल्पा चतुष्पाद्धं ज
गणो पाथवान्वो चतुर्लघुर्वा गणः स्याद्धेयं पूर्ववन्त विश्लोको नाम मात्रासमकं पद्यपि विश्लोकः पं
चमाष्टमाविति सूत्रे पंचमाष्टमाविति लघुत्वमात्रमुक्तं तथापि पंचमाष्टमयोर्लघुत्वाच्चतुर्थमात्रानंतरं
जगणचतुर्लघ्वावेव भवति नान्यथेत्यभिप्रायेणैवमूचिवान्। जयथेदमेवोदाहरणं। जयथेत्तु। सेयं

रघुपतिरास्तां हितार्थं॥ अत्राद्ये गणे विकल्पाश्चत्वारः। यथा ऽऽ १।ऽऽऽ॥२॥ ॥४ द्वितीये द्वौ ऽ।ऽ१॥ ॥२ त
२१ तीयेपि द्वौ ऽऽ१ऽ॥ मध्यगुर्वंतगुरुः सर्वलघुरूप भेदत्रयं तु चित्रायां रक्तत्वान्न भवति। चतुर्थे गुर्वंतलगणद्वय
॥ऽ१ऽऽ एतेषां परस्परघाते द्वात्रिंशत्प्रतियादं भेदाः। एतेषां चतुर्णां द्वात्रिंशदंकानां घाते जाता संख्या दश ल
क्षाः अष्टाचत्वारिंशत्सहस्राणि पंचशतानि षट्सप्ततिश्चेति अंकतोपि १०४८५७६॥ तल्लघुगलोद्गान
वासिका स्यादिति। लघुत्वलाद्दंबुधिपुगलात्समानान्तरं यदि जोन्त्यौ वासावानवासिकेति जोन्त्याव
पेति यदत्र यमनुष्टुप्योज्यं। अत्रापि द्वादशाक्षवानवासिकेति सूत्रे द्वादशवकारलभ्यन नवमपो लघुतो
क्ता सा चैवमेव नामधेयेनैवमुक्ता। जय होरदमुराहर रणान्जय ... पो। लोकहितार्थं हरिहरमूर्त्ती। अत्राद्ये
गणे विकल्पाश्चत्वारः यथा ऽऽ१॥ऽऽऽ॥३॥ ॥४ द्वितीये त्रयः ऽऽ॥२॥ ऽ२ तृतीये द्वौ।ऽ०॥ ॥चतुर्थे
द्वौपि १॥ऽ एतेषामन्योन्यताडने भेदाः प्रतिपादमष्टाचत्वारिंशत्। अन्योन्यहता जाता संख्या त्रिपंचा एमं
शत्त्रक्षाः अष्टौ सहस्राणि चत्वारि शतानि षोडश च अंकतोपि ५३०८४१६॥ वाणाष्टनवसुपदे २१

लक्ष्चित्रेति। वाणाः पंच। पंचमाष्टनवसु पादे लघुः स्यात शेषपूर्ववत्तदा चित्रानाम। अस्यामायेगणेच
त्वारो विकल्प्याः यथा ऽऽ१॥ऽ२ऽ॥२॥ ॥द्वितीये द्वौ ऽ।१॥ ॥२ तृतीये त्रयः॥ऽ१।ऽ।२॥ ॥चतुर्थे द्वौ
ऽऽ०॥ऽ० अन्योन्यघाते प्रतिपादभेदसंख्या अष्टाचत्वारिंशत्। अन्योन्यगुणने पूर्ववसंख्या॥ उपचित्रा
नवमे परयुक्त इति। नवमेमात्रा सत्तरूपे परेण दशमेन युक्ते मिलिते सति उपचित्रानाम। शेषं प्राग्वत्। ज
यदेवत्स्रेकादशादिमात्रास्वपि नियममाह अष्टाभ्योगल्या पुय चित्रेति। अष्टभ्यामनन्तरं गुरुलघुपगणा
इत्यर्थः अत्रेत्तनीयेगणौ विकल्प्यौ ऽऽ१ऽ॥ अन्येगणा विकल्प्या मात्रासमिकवत्। अन्योन्यघाते प्रतिपा
दभेदा अष्टाचत्वारिंशत्। अन्योन्यघाते संख्या प्राग्वत्। पद्वीतकृत विविधलक्ष्य पुनैर्मात्रासमादि
पादैः कलितं। अनियतवृत्तपरिमाणयुक्तं प्रथितं जगत्सु पादाकुलकमिति। अतीतानि पूर्वोक्ता। नि
कृतानि विविधानि नाप्रकाराणि यानि लक्ष्माणि लक्षणानि तद्युक्तैर्मात्रासमादीनां पचानां पा
दैः कलितं रचितं। तथाऽनियतवृत्तं पादचतुष्केपि नियतैकवृत्तलक्षणाहीनं। परिमाणेन च षोडशमा

त्रपादत्वेनपुरस्कृतंततः कर्मधारयः। एतादृशंपद्यंतत्पादाकुलकमितिअन्वर्थसंज्ञयाज्ञेयमितितत्छंदोध्याहा
३२ रेणोक्तविषोउशमात्रोयोज्यं। अत्रप्रथमपादेमात्रासमकविश्लोकचित्राणांलक्षणयोगः। विश्लोकोपवि
त्रयोर्द्वितीये। मात्रासमकवानवासिकयोस्तृतीये। उपचित्राविश्लोकयोश्चतुर्थइति। इदंचप्रतिपादमनेक
लक्षणयोगंमत्वोदाहरणंमंतव्यं। अन्येतुप्रतिवादमेकैकलक्षणयोगंवदंतःसमुदितेषुविविधलक्ष
णयोगोभिप्रायेणेदंव्याचक्षते। वयंतूभयथाप्याख्यानेदोषाभावंवदामः। अतएवमात्रासमकादि
प्रकृतिभिः पादाकुलकमितिसूत्रकारःसामान्यतएवाह। तथामात्रासमकविश्लोकवानवासिको
पचित्राणामसंकीर्णपादबद्धोदाहरणंवाहात्रवृत्तिकृत। यथा। अलिवाचालितविकसितचूतेकरले
मदनसमागमे-- इतीयमेताकोलांपरिहृतत्वात्यर्थः पादाकुलकधावतिपापइति। संकीर्णोदाहरण
तुमूलएववतेनोभयथापिनदोषः। अत्रपंचानांमात्रासमकादीनांपरस्परसंकरेचत्वारिंशदधिक एम०
शतंभेदाभवंति। तद्यथा। अत्रैककाष्ठकस्यैकद्विपसंख्याकवत्तद्द्विपस्यसंकरेवद्धमाणोपजाति ३२

प्रस्तारमार्गेण चतुर्दश चतुर्दश प्रतिकोष्ठं भेदा भवंति। एवं च प्रथमद्वितीययोः ५ प्रथमतृ
तीययोः प्रथमचतुर्थयोः प्रथमपंचमयोः संकरे चत्वारश्चतुर्दशका मिलित्वा षट्पंचाशद्भवं
ति ५६। तथा द्वितीयतृतीययोर्द्वितीयचतुर्थयोर्द्वितीयपंचमयोः संकरे द्विचत्वारिंशत् ४२
तथा तृतीयचतुर्थतृतीयपंचमयोः संकरे ष्टाविंशति २८ तथा चतुर्थपंचमयोः संक
रे चतुर्दश १४ तेषां सर्वेषां मेलने शतमेकं चत्वारिंशच्च १४०॥ एतेषामुदाहरणानि दु
ष्टानि विस्तरभयान्नोच्यंते॥ अत्रावलक्ष्मादीनां सर्वेषां षोडशमात्रपादत्वेन सत्यां मात्रासमकसंज्ञा
॥ अथोक्तानां वक्ष्यमाणानां च वृत्तानां गुरुलघुमात्रावर्णैयत्ता परिज्ञानोपायमाह। वृत्तस्येति। विनाव
र्णैर्गीवर्णा गुरुभिस्तथा। गुरवो लैर्द्दले नित्यं प्रमाणमिति निश्चितमिति। वृत्तस्य या मात्रा वर्णैर्विना गा
गुरवो शेषा इत्यध्याहारः। ला वर्णा गा इत्यादिभिः शब्दैस्तत्तत्संख्या लक्ष्यते। ततश्चायमर्थः। यदि वृत्तस्य
मात्रावर्णयोः संख्या विज्ञाता गुरुलघुसंख्या च न ज्ञाता तदा मात्रासंख्यायां वर्णसंख्यामपनीयाव

२२ शिष्यगुरुसंख्यास्तेयेति। वर्णसंख्यामध्येचज्ञातगुरुसंख्यामपनीयावशिष्टालघुसंख्यास्तेयेत्याशयः। यदि
तुमात्राणांगुरूणांचज्ञातंसंख्यत्वंवर्णाख्याज्ञातसंख्यास्तदाततस्तानोपायमाहवर्णइतितपावृत्तस्यमा
त्रागुरुभिर्विनावर्णाज्ञेयाः वृत्तमात्रासंख्यायांगुरुसंख्यामपनीयावशिष्टावर्णसंख्येत्यर्थः। वृत्तमात्रा
लघुसंख्यास्थानेसतिगुरुस्थानेप्रकारान्तरमाहगुरवइति। वृत्तस्यलाइत्यनुषंगः। वृत्तस्यमात्रालैर्लघु
भिर्विनादलेर्वेहतेगुरवोज्ञेयाः। वृत्तमात्रासंख्यायांलघुसंख्यामपनीयावशिष्टांसंख्यामिधीकृत्यताच
समाणागुरुसंख्येत्यर्थः। उक्तांगुर्वादिसंख्यामुपसंहरति॥ नित्यमिति। इत्यमुनाप्रकारेणप्रमाणंगुर्वादी
नांनित्यंसर्वदानिश्चितंभवतीतिशेषः। वृत्तस्येत्युपलक्षणंपद्यादावपिसंभवति। अत्रचगुरुवर्णसंख्या
नोपायप्रदर्शनमुपलक्षणार्थं॥ तथाहिमात्रावर्णगुरुलघुचतुष्टयात्मकेवृत्तेद्वयोर्द्वयोरिपत्तोपरिछेदेः
मयोः संख्यापरिछित्तेः। तद्यथा। मात्रावर्णयोर्मात्रागुर्वोर्मात्रालघ्वोर्वर्णगुर्वोर्वर्णलघ्वोर्गुरुलघ्वो रम०
श्चषट्सुद्विकेषुएकैकद्विकस्थानेऽपरंद्विकमुक्तदिशाज्ञेयमिति। इदंसर्वमुदाहरणेयोज्यंते॥ वागपविव २२

संयुक्तावित्पन्नचतुर्दशमात्रासु अष्टरूपं वर्णसंख्यामपनीयावशिष्टाः षड्गुरुवर्णसंख्या पूरकौ च द्वौ लघू ए
वं षड्रूपा गुरुसंख्यामपनीयावशिष्टा वर्णा अष्टौ। गुरुगणपक्षा द्वावशिष्टौ द्वौ लघू। एवं लघू द्वावपनी
यावशिष्टद्वादशसंख्यायामर्धितायां षट्संख्या गुरवः। गुरुभिर्द्वादशमात्राः सिध्यंति द्वौ लघू इति। एवं व
र्णगुरुज्ञाने वर्णलघुज्ञाने गुरुलघुज्ञाने चेतरद्वयज्ञानं यावत्॥ एवं सर्वेषु गणप्रपंचेषु॥ ॥ इति नारा
यणभट्टविरचितायां वृत्तरत्नाकरटीकायां मात्रासमप्रकरणं॥ ॥ मात्रानियमाघटितचान्योन्याव
त्तप्रसंगेनाह। द्विखंडकामाह। शिखियुगलितद्विशलघुरचितमपगतलघुयुगलमपरमिदमखिलं। त
द्गुरु शकलयुगलकमपि सुपरिघटितललितपदचिततिर्भवति शिखेति॥ शिखिनो गार्हपत्याहव
नीयदक्षिणाग्न्याख्यास्त्रयोऽग्नयः तेषां त्रित्वात्तत्संख्या लक्ष्यंते तेन। शिखिभिर्गुणिता त्रिगुणी
कृता ये द्विशल लघवस्तैरचितं एकं शकलमित्यध्याहारः अपरमित्यग्रेऽभिधानात्। तत्र अपगतमूनं ल
घुद्वयं यस्मात्तादृक्कार्यं। अपरं द्वितीयं। शकलमित्यपीत। इदं पूर्वोक्तमखिलं समग्रं लघुद्वयान्तं

३४ त्रिंशल्लघुकं भवति। शकलयुगलकमर्धद्वयमपि सगुरुस्वंते धिकैकगुरुयुक्तं। सुष्ठु परिघटिता रचिताल्ल
लिता पदवितति॰ पदरचना यत्र तादृशं च भवति शकलयुगलं यस्याः सा शिखेति। यत्तद्भ्यामध्याहारेण अ
र्थः। अयं भावः। पूर्वार्धे अष्टाविंशतिर्लघवः। एकश्च गुरुरिति एकोनत्रिंशदक्षराणि। उत्तरार्धे त्रिंशल्ल
घव एको गुरुरिति एकत्रिंशदक्षराणि यत्र सा शिखेत्यर्थः। सुपरिघटितेति पदेन श्रुतिसुखकर्त्री यतिः
कार्येति सूचयति। विनिमयविनिहितशकलयुगलकलितपदविततिविरचितगुणनिचया। श्रुति
सुखललितपदमपि जगति निजशिरउपगतवति सति भवति खजेति। इयमेव शिखा यदि विनिमयेन व्य
त्यासेन विनिहितं निवेशितं यच्छकलयुगलं तेन कलिता घटिता पदसमुदायरूपततैकुमार्यादि प्रगणं
समुदायवती चं कलितां तस्य पदादिना कर्मधारयः श्रुतिसुखललितेति पूर्ववद्व्याख्यातिकार्येति सूचि
तं। निजकारे जशिरः जकार प्रायगुरुस्वरूपं स्यात् ततिः खना भवति। खजेति यावत्। गुरुद्वयस्य छंदसि प्र रगः
वेशाय तु मशकालादृतिप्रकारो यं। विनियमविनिहितशकलयुगललघुललितपदविततिरचिते ३४

ति पाठपुगलांतस्य जातिवृत्तादिना कर्मधारयः। कृतिसुखकारिणी चेति पूर्वविषयपिसूत्रकरणं यदेतस्य
कृत्यशिखैकान्नत्रिंशदेकत्रिंशदं तेगिति खंजामहत्यपुजीति च वदता पूर्वोक्तनियमवदेकोनत्रिंशद
रैकत्रिंशदक्षरचितक्रमवघुक्रमवत्सादेद्व पदावृत्तार्धद्वयवत्यौ विंशत्यधिकशताक्षरे। शिखाखंजाभ्या
मेते अन्ये एव सूत्रानुक्ते एवात्रोक्ते। सूत्रोक्ते तु चतुर्थ्यार्धे ऽर्धसमत्वात्त्वयमङ्घ्रोऽनपदोभयत्रापि श
कलशाखैऽव्यवयवचनत्वात्सादृह्यापावपरौकृत्वामूलोदाहरणेव अर्धविषयेमत्वार्धसमत्वेपि च मात्रा
नियमात्मेकत्वान्मात्रावृत्तप्रकरणोक्तिसमाख्यापसूत्रानुसारः कार्य इति सर्वं सुस्थं॥ ॥अष्टावर्धेग
घ्वभ्यस्ता यस्याः सानंगक्रीडाक्ता। दलमपरमपि वसुगुणितलिलनिधिलघुकविरचितपदविततिम
वतीति। यस्या अर्धे अष्टौ गागुरवो ऽभ्यस्ता द्विगुणिताः षोडशेत्यर्थः। अपि च्चा र्थ॥ अपरं च दलं द्वितीयम
र्धं वसवो ऽष्टौ तैर्गुणिताः सलिलनिधिलवश्चैत्वारोलघवो द्वात्रिंशत्र्तत्वादकृ। कविनारचितापदानां
विततिर्विस्तारोयत्र ताद्गम्भवति सानंगक्रीडेति तत्त्पोक्ता वृत्तज्ञैः। पूर्वार्धे षोडशगुरवः उत्तरार्धे द्वात्रिंश।

छवव्वकार्याइतितात्पर्यार्थः। कवीत्यादिना अतिसुखायपतिर्भवितीत्यस्यसूचनं। पैंगलेतियंसौम्येतिसंज्ञिता। अ.२
२५ इयमेवप्रस्तारस्थार्धतायांज्योतिरारव्याभवति। उदाहरणंतु। यदिसुखमनुपममपरमभिक्षपसि परिहरयुव
तिपुरतिमतिशयमिह। आत्मज्योतिर्योगाभ्यासाद्दृष्ट्वादुःखच्छेदंकुर्याः। अनयोर्ईमोः। शिखेतिसामान्यसं
त्रिद ज्ञापैंगलउक्ता॥ त्रिगुणनवलघुरवसितिगुरुरिलयुगहननतनुरतिरुचिरेति। त्रिगुणानवलघवोयत्रस
प्तविंशतिरित्यर्थः। अवसितावसानेगुरुर्यस्याः सातथा। इत्यमुनाप्रकारेणार्धद्वयपरचितशरीराऽतिरु
चिरासंज्ञा। पैंगलेतियंचूलिकेत्युक्ता॥ अर्धसमत्वेप्यस्यामात्रामात्रवृद्धितत्वादन्योक्तिः। चूलिकार्धमे
कोनत्रिंशदंतेऽग्विति सूत्रपाठपक्षेणैवमुक्तं। चूलिकार्धमेकोनत्रिंशदेकत्रिंशदंतेग्विति पाठेतु प्रथमं
द्वितीयंचार्धक्रमेणैकोनत्रिंशदेकत्रिंशन्मात्रंभवति अतेचमात्राद्वयस्यानगुरुरेकः स्यात्ताचूलिकेति
सूत्रार्थः। अस्मिन्पक्षेमूलानुक्तमुदाहरणंममैव। रघुकुलनलिनविकसनशशभृतिदृशमुखमुख रामः
रिपुतिमिरहरे। विषधरविषमविषयविषहरमहसि कुरुरतिमिहदशरथतनये। अत्रसूत्रेर्धद्वयग्रहणंसा २५

दनियमो नास्ति। इह त्वावसितिगुरुरितिपाठेन ⌐ एवेवावसाननाम्नेति सूचितं॥ ॥इति श्रीमद्भट्टरामेश्वर
सुतनारायणभट्टविरचितायां वृत्तरत्नाकरटीकायां वृत्तकौमुद्यां मात्रावृत्ताधिकारो नाम द्वितीयोध्यायः॥
॥ श्रीः॥ एवं मात्रावृत्तान्यभिधायाधुनावर्णवृत्तेषु समवृत्तानि कीर्त्तयति। उक्तेति। अधिक्षिपत इति शेषः
सप्तम्यंतपाठेनुमेदात्रमिधीयंत इति। एवमग्रेप्युक्तादिष्वपिव्याख्येयं। गुः श्रीरिति। एकाक्षरपादायामुक्ता
यां गुरुरेकश्चेत्सा इत्तदा श्रीर्नाम। लक्ष्यलक्षणयोरेकाक्षरेणयादेनास्यग्रहणं द्वौ हाहरणमेतत्। नोक्ता
उक्तादिभेदाप्येयं प्यगौरवभीतितः। तां त्वपाशब्दविहीनवदामोस्मत्र दर्शनात्॥१॥ अस्माभिस्तु कृतेनव्ये
काव्ये राम कुतूहले। उक्ता [illegible] उक्तादयो व्यक्ता विवक्तव्याः सयुक्तिभिः॥
अत्र वक्ष्यमाणसंख्याख्यानप्रकारेण वृत्तभेदा॥२॥ नवसप्तति छंदातानां पंचानामत्यतीनां सूत्रानुक्तत्वाभि
र्लत्नेतेति शंक्यं। द्विकौ ग्लाविति प्रस्तारकथने परे पूर्णमिति मेरुप्रस्तारकथने च सूत्रकारेण प्रदर्शि
तत्वात्। वक्ष्यतर प्रचाराभावाच्च गणभेदवत्तस्लक्षणानुक्तेरुपपत्तिः। अथात्युक्ता। गौस्त्रीति॥ द्वौ गुरु

यदि पादे स्तदा स्त्री नाम। अत्र वृत्तसंख्या ४॥ अथ मध्या॥३ मो नारीति। मो गणो चेत्स्याद्तदा नारी नाम्ना। रो मृगी
३६ ति। र गणो चेत्स्याद्तदा मृगी। अत्र संख्या ८। अथ प्रतिष्ठा ४॥ म्गौ चेत्कन्येति। मगे म गणो गुरु चेत्स्याद् अत्र गु
रुरित्यर्थः तदा कन्या। अत्र संख्या १६। अथ सुप्रतिष्ठा ५। भ्गौ गिति पंक्तिरिति। भगणो गुरु पुनर्गुरु श्चेत्सैव
पंक्तिः। संख्या ३२। अथ गायत्री॥ त्सौ तत्तनुमध्येति। तगणो य गणो यदि स्तो भवतः तदा तनुमध्येति। यदि त
देत्यध्याहार्यं। शशिवदना न्यौ इति। न गणो य गणो यदि पादे स्तस्तदा शशिवदना॥ विद्युल्लेखा मो म इति। म
गणो चेत्स्याद्तदा विद्युल्लेखा नाम। त्सौ चेद्वसुमतीति। तगणो स गणो चेत्स्याद्तदा वसुमती॥ गायत्रे
षु सर्वेषु पादान्ते एव पतति सामान्यः॥ अत्र संख्या ६४। अथोष्णिक् ७। म्सौ गः स्यान्मदलेखेति। म गणो स ग
णो गुरु भिर्मदलेखा नाम। तपा। तरंगैर्हंसमाला। मधुमतिर्ननगाः। कुमारललिता ज्सौ ग्। अत्र ह्यष्वाप
चभिश्च पतिमाहुः क्वचित्। अन्ये तु पादान्त एव॥ अत्र संख्या १२८। अथानुष्टुप्॥ भौ गिति चित्रपदा ग इति। राम॰
भगणौ गुरु च यत्र पादे इत्येव सा चित्रपदा॥ पादे पतिः। मो मो गो गो विद्युन्मालेति। म गणौ द्वौ च गुरु द्विषु ३६

न्मालेति। चतुर्भिश्चतुर्भिश्च यतिरित्ति संप्रदायः। माणवकं भात्तलगा इति। भाद्भगणात्तगणाल्लघुगुरुयोग
न्नंदितदा माणवकं। माणवकक्रीडितकमिति पिंगले संज्ञा। पूर्ववद्यतिः। म्नौ गौ हंसरुतमेतदिति मग
णनगणौ गुरू च द्वावेतद्धंसरुतं नाम। ज्रौ समानिका गलौ चेति। रेफजकारौ गुरुलघू च समानिका ना
म। प्रमाणिका जरौ लगौ चेति। जगणरेफौ लघुगुरू च प्रमाणिका। समासेव समानिका। प्रमाणिकैव प्र
माणिका। स्वा पैंकं छंदोनुरोधात्तद्धलः। वितानमाभ्यां यदन्यत्। इति। आभ्यां समानीप्रमाणीभ्यामन्य
दनुष्टुप्जातीयं छंदो वितानसंज्ञं। आभ्यामन्यदिति उक्तलक्षणनियमाभावोपलक्षणं। केचित्तु समानि
कायां गुरुलघुक्रमेण समाप्तिः प्रमाणिकायां लघुगुरुक्रमेण। वितानेतु द्वौ गुरू द्वौ लघू। द्वौ लघू
द्वौ गुरू वा। द्वौ गुरू एको लघुः पुनर्द्वौ गुरू इति वा। द्वौ लघू एको गुरुर्द्वौ लघू इति वा। एको गुरुर्द्वौ लघू
पुनर्गुरुरिति वा एको लघुर्द्वौ गुरू पुनर्लघुरित्येवं वानियमं इत्याहुः। तत्र द्वौ गुरू द्वौ लघू इत्यस्योदाहर
णं। तस्मात्सज धर्मभज पापे हृदयमाकुरु। इत्यादि लक्ष्मी त्सव्रशिष्टानन्निशसेऽन्या द्वौ लघू द्वौ गुरू

त्यक्तोत्सहहरिणी हृदयं यस्य विशालं गगनाभोगसमानं। लभते सोमशिरोमणिचित्रनृपतिमूर्द्धि वितानं। एवमन्यत्रा
३० प्युदाहार्यमेवमेतत्तु गरुहृल्लीमए एतन्न एतेषां वितानतेति न तु नियमः। अत एवोक्तं नियमोऽतिक्रमे शैवोदाहर
णामूले। सूत्रमपि वितानमन्यदिति सामान्यत एव न तु नियमेकं विदाह। कृत्तिकृदपि सूत्रकारो वितानस्या
नेकतां दर्शयतीति बहुत्वेनैकतामात्रमाह न तु नियमम् इमिति। तथा। नाराचिकात रौगलौ। अत्र सं
ख्या २५६॥ अथ पङ्क्तिः ५। शान्तसा विहह हलमुखीति। रगणनंतरं नगणसगणौ चेदिह छंदः शास्त्रे हल
मुखी नाम। त्रिभिः षड्भिश्च यतिरिति संप्रदायः४। भुजगशिशुसृता नौ म इति। द्वाभ्यां नगणाभ्यामेकेन च मग
णेन भुजगशिशुसृता। सप्तभिर्द्वाभ्यां च यतिः। तथा। भद्रिकेति र नौ रियं। वृत्तसंख्या ५१२॥ अथ पंक्तिः १०
म्सौ ज्गौ शुद्धविराडिदं मतमिति। मगणसगणौ जगणगुरू च शुद्धविराण्मतं छंदो विदां। पादांते यतिः॥
६ म्नौ यौ चेति पणवनामेदमिति। मगणनगणौ नगणगुरू च पणवनाम। पञ्चभिः पंचभिश्च यतिः४। ज्रौ छं०
र गौ मपूरस्तारिणी स्यात् इति। रजरगणगुरुभिर्मपूरसारिणी नाम। पादांते यतिः। म्भौ सगयुक्तौ रुक्मव ३०

तीपमिति भमसगणैर्गुरुणा च रुक्मवती नाम । चंपकमालेत्यस्मो । पादांते यतिः । मत्ता ज्ञेया मभसगयु
क्तेति । मभसगणैर्गुरुयुता मत्ता नाम । चतुर्भिः षड्भिश्च यतिः । नरजगैर्भवेन्मनोरमेति । नरजगणैर्गुरु
भिर्मनोरमा नाम । पादे यतिः ४ ॥ त्जौ ज्गौ गुरुणेयमुपस्थितेति । तजगणैः गुरुणा युक्ता चेदुपस्थि
ता पादे यतिः । द्वाभ्यामष्टभिश्चेमे के । अत्र संख्या १०२४ ॥ अथ त्रिष्टुप् ११ स्यादिंद्रवज्रा यदि तौ जगौ
गः इति । ततजगणैर्गुरुभ्यां चेदिंद्रवज्रा । पादे यतिः ३ उपेंद्रवज्रा जतजास्ततो गौ इति । जतजगणैर्गुरुभ्यां चे
पेंद्रवज्रा पादे यतिः । अनंतरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः इति । अस्य वृत्तिः तौ केंद्रव
ज्रोपेंद्रवज्रालक्षणं तौ पादौ यस्यां वृत्तौ ता उपजातयो नाम । अत्र पूर्वोक्तलक्षणपादद्वयेन य
थायोगमेकादिरादृत्या निष्पत्तिर्विवक्षिता न तु द्वाभ्यामेव वृत्तपूर्त्तिः । पादद्वयमात्रवृद्धि तस्य वृत्तस्याभा
वात् । द्विवचनं च लक्षणद्वययोगेन लक्षणया नेयं । ताश्चतुरक्षरप्रस्तारवत्प्रस्तारे सति आद्यंतभेद
योः केवलेंद्रवज्रोपेंद्रवज्रत्वात्ता गे च चतुर्दश भवंति । पपा ॥ इंउउउ । उइंउउ । इंइंउउ । उउइंउ । इंउइंउ ।

उइंइंउ।इंइंइंउ।उउउइं। इंउउइं। उइंउइं। इंइंउइं। उउईइं। इउइंइं। उइंइंइं। इतितत्पाववृक्षाः। एकत्रपादेच
२८ णांद्वयेवापादत्रयेवान्यतरस्थितिश्चेत्। तयोरिहान्यत्रतदोहनीयाश्चतुर्दशोक्ताउपजातिभेदाइति॥
तत्राद्यभेदोदाहरणं। दैत्याधिपप्राणमुषांनखानांमुपेयुषांभूषणतांप्रतेनांप्रकाशकाईररस्यगु
णोदधानाःस्तनौनतस्तपःपरिवव्रुर्नामूलश्लोकस्तषष्ठभेदोदाहरणं। एवमन्येष्वपिभेदेषूदाहर
णानिकाव्येषुविवेचनीयानि। इयंकिलान्यासांविमिश्रितासुस्मरंतिजातिष्विदमेवनामेति। अन्या
स्वपिजस्यादिजातिषुइत्थंसमानसंख्याक्षरत्वसमानयतिकत्वादिप्रकारेणमिश्रितासुइदमेवोपजाति
नामवृद्धाःस्मरंति। ग्रंथांतरेभोजतालाचदंतीसर्पः। इत्यमित्यनेनविषमवर्णसंख्यानांविषमयतिकादीनां
चजातीनांमार्यादीनांचमिश्रणेउपजातित्वनास्तीतिसूचितं। स्मरतीत्यनेनचकविप्रयोगदर्शनानुरोधस्सू
चितः। नत्रेंद्रवंशावंशस्थाभ्यामुदाहरणं॥ इत्थंरथाश्वेभनिषादिनांप्रगेगणोनृपाणामथतोरणाद्बहिः छंद०
हिः॥ प्रस्थानकालक्षमवेषकल्पनाकृतक्षणक्षेपमुदैक्षताच्युतं। एवमन्यत्रापिप्रयोगवशादुदाहरणं २८

तेयां सवृत्तामुपजातीनामुक्तयादिशा चतुर्दशभेदा भवंति। विषमार्धसमरूपत्वे प्युपजातीनां सम
वृत्तेषूपमासस समवृत्तवदिति तथा प्रासंगिकः॥ नजजलगैर्गदिता सुमुखीति। नजजैर्गरौ लघुगुरू भ्यां
च सुमुखी नाम। पंचभिः षड्भिश्च यतिः॥ दोधकवृत्तमिदं भभभा गाविति। भगणत्रयाद्गुरुद्वयं चेत्तदा दोध
कनाम। भभभादि समाहारे द्वंद्वैकवद्भावः। दोधकनामनि भत्रयतो गाविति वा पाठः। पादांते यतिः।
शालिन्युक्ता म्तौ तगौ गोब्धिलोकैरिति। मतगैर्गुरुभ्यां च शालिनी। अब्धिभिश्चतुर्भिर्लोकैः सप्तभिश्च य
म्भौ तिरिति शेषः। एवमुत्तरत्रापि वातोर्मीयं कथिता [illegible] तगौ गइति। मभतगगुरुभिर्वातोर्मी। इयमिति शा
लिन्युक्तयतिमतीत्यर्थः। पंचरसैः श्रीर्मतनगगैः स्यादिति॥ मतनगगुरुभिः पंचभिः सप्तभिश्च यतौ श्री
र्नाम। म्भौ न्लौ गः स्याद्भ्रमरविलसितमिति। मभनलगुरुभिः भ्रमरविलसितं चतुर्भिः सप्तभिश्च यतिः
रान्नराविह रथोद्धता लगाविति। रनरलगैरिह छंदःशास्त्रे रथोद्धता। पादे यतिः। स्वागतेति रनभाद्गुरु
युग्ममिति रनभगणेभ्यः परं गुरुयुग्मं यदि तदा इत्थं स्वागता। रनभादि समेकवद्भावः। पूर्ववद्यतिः। नन

सगगुरुरचितावृत्ता॥ननसगगुरुकैः[blot]तावृत्तानाम।चतुर्भिःसप्तभिश्चयतिः॥ननरलगुरुभिश्चभद्रिकेति॥न
२९ ननरलगैर्भद्रिका॥पादेयतिः॥श्येनिकारजौरलौगुरुर्यदेति।स्पष्टं।पादेयतिः।मौक्तिकमालायदिभतना
द्गाविति।भतनादिसेकवगावः।पंचसुषट्सुचयतिः।उपस्थितमिदंज्सौताद्गकाराविति।जसतगगैरु
पस्थितं।पादेयतिः।तपा।उपचित्रमिदंस सतालगौविति।कुपुरुषजनितानतौगौगः इति।अनव
सितान्सौभगैगुरुश्चेत्तोऽत्रवृत्तानि२०४८॥ ॥अथजगती१२।चंद्रवर्त्मनिगदंतिरनभसैरिति।रन
भसैर्गरैश्चंद्रवर्त्म।चतुर्भिरष्टभिश्चयतिः।जतौतुवंशस्थमुदीरितं[blot]जराविति।जतजरैर्वंशस्थं।पा
देयतिः।स्यादिंद्रवंशाततजैरसंयुतैरिति।ततजैरसंयुतैरगराःसहितैरिंद्रवंशा।पादेयतिः।इह तोटकमं
बुधिसैः प्रथितं।अंबुधिसैश्चतुर्भिः सगणैः।पादेयतिः।द्रुतविलंबितमाहनभौभरौइति।नभभरैर्द्रुत
विलंबितमाहाचार्यः।पूर्ववद्यतिः।मुनिशरविरतिर्नौम्यौपुटोयमिति।मुनिभिःसप्तभिःशरैःपंचभि। एम०
श्चविरतिर्यस्मशाप्रमुदितवदनानामवेन्नौररावाविति।स्पष्टं।नपसहितौन्यौकुसुमविचित्रेति।स्पष्टं।द्वयोरपिपा २९

देयतिः ॥ रसौजसजसाजलौ गुरुर्नगतिरिरिति रसाश्चरताश्चेत्येक शेषेषड्भिः षड्भिश्चयतिः । भुजंगप्रयातंभ
वेद्येश्चतुर्भिः । रैश्चतुर्भिर्युताल्लग्विणी संमता ॥ भुवि भवेन्नभजरैः प्रियंवदेति त्रीणि स्पष्टानि । पादेयतिः ।
त्सौसोमरागिमालाच्छिन्नागुहवक्त्रैरिति । तपनयमैर्मणिमाला ॥ गुहस्यषण्मुखस्यवक्त्रैः षड्भिः षड्भिश्चछिन्ना
यतिमती स्पष्टः । धीरैरभाणिललितातभौजरौ भिन्नाहरौसजससेहदिता । एतेस्पष्टे । पादेयतिः । नन
भरसहिताभिहितोज्ज्वलेति । महिताप्रद्विताश्रेष्ठत्वस्पष्टः । उज्ज्वलेतिनाम । पादेयतिः । पंचाश्वैःवैश्वदेवी छिन्नावै
ममौयौइति । पंचभिः सप्तभिश्चछिन्नायतिमतीवैश्वदेवीनाम । अब्धिप्राभिर्जलधरमालाम्भौस्मौ । इतिच
तुर्भिः अष्टभिश्छिन्नेतिअनुषंगः । पैंगलेऽपिएवमेवकांतोत्पीडा । इहनवमालिकाननभयैः स्यादिति । इह
छंदः शास्त्रेअष्टभिश्चतुर्भिश्चयतिरितिवृद्धाः । स्वरशरविरतिर्नजौरौप्रमेति । स्वरैः षड्जादिभिः सप्तभिः
शरैः पंचभिश्चयतिर्यत्र । भवतिननायपमालतीजरौइति । पंचभिः सप्तभिश्चयतिः । अभिनवतामरसं
नजजायः । इतिस्पष्टं । इदमेवान्येललितपदंलाहुः ॥ पादेयतिः । तथा । नयुगरयुगयुक्तागौरीमतेति । पं
जरौजरौवदंतिपंचचामरं ॥

चमुनिभ्यो सात्तपुताजलनाजिजितमभिहितं नोम्सो नामतः। द्रुतपदं भवति नभनयाश्चेत्। अत्र वृत्तसं
४० ख्या ४०९६॥ अथातिजगती १३॥ तुरगरसयतिर्नौ ततौ गः क्षमेति। ननततगगुरुभिः क्षमा। सप्तभिः ष
ड्भिश्च तत्र यतिः। चंद्रिकेत्यन्यो। म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणी यमिति। त्रिभिर्दशभिश्च यतिर्यत्र सा। च
तुर्ग्रहैरतिरुचिरा जभस्जगा इति। जभसजगैश्चतुर्भिर्नवभिश्च यतौ रुचिरा। वेदै रंध्रैर्म्तौ यसगौ मत्तमयू
रमिति। वेदाश्चत्वारो रंध्राणि नव। सजसाजगौ भवति मंजुभाषिणी। स्मृतं। पंचभिरष्टाभिश्चात्र
त यतिः। ननततगुरुभिश्चंद्रिकाश्वर्तुभिरिति। अश्वाः सप्त ऋतवः षट्। इयं क्षमेवाचार्यमतभेदेन संज्ञांत
रायं पुनरुक्तेः। तथा। पमौ रौ विख्याता चंचरीकावली गः ‒ ‒ स्त्रग्भवति रुचिरां बुधिग्रहैः॥ भरतम
तेनेयमेव पूर्वं रुचिरोक्ता। नसरयगं गेश्चेद्रलेखर्त्तुलोकैः। अन्तमुनियतिर्वियुन्नसौ नौ गुरुः। अत्र वृ
त्तसंख्या ८१९२॥ अथ शक्करी॥१४॥ म्तौ न्सौ गावक्षग्रहैर्विरतिरसंबाधेति। मतनः सगलोर्गुरुश्चां एम॰
चा संबाधा नाम। अत्र क्षैर्वाणैरिंद्रियैः पंचभिर्ग्रहैर्नवभिश्च यतिर्यत्र सा तथा। ननरसलघुगैः स्वरै ४०
२५

राजितेति। स्वराश्च स्वराश्चेत्येकशेषे सप्तभिः सप्तभिश्च यतिर्भवति। ननभनलघुगैः प्रहरणकलितेति। एवं
कैवसप्रमेयति ४॥ उक्ता वसंततिलका तभजाजगौ गः॥ इति। तभजा गणाः जगौ गुरुत्वद्वसंततिलका।
संहोन्नतेयमुदिता मुनिकाश्यपेनेति। काश्यपेन मुनिनेयं वसंततिलका सिंहोन्नतोक्तेति। संस्तीतरोक्तिः।
उद्धर्षिणीयमुदिता मुनिसैतवेनेति। सैतवेन तच्चार्येणेयमुद्धर्षिणी सुक्ता। इंदुवदना भजसनैः सगु
रुयुग्मं विनेति। सगुरुयुग्मैरिति गुरुयुगलसहितैर्भजसनैः ५॥ द्वि ७ सप्तच्छिदलोला म्सौ म्सौ गौ चरणोचे
त् इति। द्विर्द्विवारं सप्तसुच्छित्छेदो यतिर्यस्याः सा लोला नाम। तथा ननततगुरुगैः सप्तयतिर्नदी
स्यात्। ज भ्नी रंतविरामा म्सौ भजौ गुरुयुग्मं॥ त्रिनगं नसगिति वसुपतिलपवित्रं। मध्यक्षामा युगद
शविरमा म्भो म्यो गौ। इदमेव कुटिलमिति सप्तभिः। नजभजला गुरुश्च भवति प्रमदा। सजस्यजजोगिति
शरग्रहैर्मंजरी। नजभजे गे गुरुश्च वसुषट्कुमारी। नरननैर्लगौ चरवितं सुकेसरं। अत्रवृत्तसंख्या
२६३८४॥ अथातिशक्करी १५॥ द्विहनहयपलघुरथ गितिशशिकलेति। द्विगुणितानहयाः सप्त
७ गो मे मरेवक्कथिता मधुमाधवीति मुनि ~~काश्यपेन इयमेव वसंततिलका~~॥१५॥

लववोपन्नतात पा। अ। पतद्नंतरंयगुरु ४। गुर्वंताश्चतुर्दशलवकः शशिकलेत्यर्थः। इयमेवपैंगलेन
४१ ननननसेश्चंद्रावर्त्तानामोक्ता। अत्रतसभिस्स्थभिश्चयतिरितिसंप्रदाय ४। स्रगितिभवतिरसनवकयति
रिपंञ्चवं शशिकलैवरसेषु षड्सु नवसु च यतौ स्रगितिसंज्ञितामालेत्यर्थः वसुहयपतिरिह मणिगु
णनिकरः। इयमेवशशिकला मणिगुणनिकरसंज्ञितेतियतिभेदेनसंज्ञांतरहृपमुक्तं।। ननमय
यपुतेयमालिनीभोगिलोकैरिति। भोगिभिर्नागैरष्टभिः लौकैर्भुवनादिभिः सप्तभिर्यताविति शेषः
नागलोकैरितिहचिरः पाठः। भवतिननौभगौ। [illegible]रसहितौपभद्रकमिति। रसहितौरगणायुक्तौ। स
मलघुसवयतिः। सजनाननयौशरदशयतिरियमेलेति। शरेषु पंचसु दशसु चयतौ सजनननयैरेला
नाम। भौभौयांतौभवेतांसप्तभिश्चंद्रलेखेति। यांतौ। अंतेयगणायुक्तौ। तपा। मावारणस्युर्यसं
साकामक्रीडासंज्ञाहेपा। नजभजरैर्विराजितमिदंसुकेसरं। चन्द्रलेखाभिधारोमौयोविरामः स्वराश्चैः। एम०
ननतभरलतांगैः स्वरैरुपमालिनी। अत्रवृत्तानि। २२७६८।। अपाष्टिः १६ भनिनगैः स्वरान्त्वमष ४१

भर्गजविलसितमिति। मौ च त्रयो नाश्च गुरुश्च तैरिति विग्रहः। स्वरात्समासंख्यं विरामो यदि तदेति शेषः। त
त्सुपतितः पादांते च पतितः प्राप्ते वेति सानोक्त॥ स्वरास्परंख्यं शरीरच्छिद्रं नवकं पतितस्थानमिति शेष इति
वार्थः। अथ मेस्मादि सप्तदशनाम। नजभजरैः सदा भवति वाणिनी गयुक्तैरिति। गयुक्तैर्गुरुयुक्तैरिति तत पा
चित्रसंतमीरितिं रजौ रजौ रगौ च वृत्तं। जरौ जरौ ततो जगौ च पंचचामरं वदेत्। तेकपिताः मरौ नरौ नगा
श्वधीरललिता। पंचमकारपुत्तारवगतिर्यदि चांतगुरुः। अत्र संख्या। ६५ ५३६। अथात्यष्टिः १७ रसैरु
द्रैश्छिन्नायमनसभलागः शिखरिणीति। रसैः षड्भिः रुद्रैरेकादशभिश्छिन्ना यतिमती। जसौ जस
यला वसुग्रहयतिश्च पृथ्वी गुरुरिति। वसुभिरष्टभिर्ग्रहैर्नवभिश्च यतिमती। हि। मुनिवंशपत्रपतित
भरनभनलगैरिति। हि शोदशमुनयः सप्तादि शोमुनय श्चेति समाहारे द्वंद्वो विशेषणं। पतितसनतेन
यतसंख्याकाक्षररूपनाविवक्षिता। हि। द्रु। निमिषं शयनमिति एकवायदं। पतिपदस्य मध्यमस्य
लोपेन वा समासः॥ नन्न यतिस्थानमिति विवाध्याहारः। हि॰ नियती तिपदेस्य पदलोपरति केचित्। लु

स्वविभक्तयतमित्यन्ये। तदुभयंचित्सं। रसयुगहयैर्न्सौ ॥ म्रौ स्लौ गो यदा हरिणी तदेति। षट् चतुर्षु सप्तसु च यतिषु
४२ स्थानेषु यतो हरिणी नाम। मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेदिति। मभनततगगैर्मन्दाक्रान्ता।
जलधिषडगैश्चतुर्भिः षड्भिर्द्विरगैः पर्वतैः सप्तभिः। हयदशभिर्नजौ भजजला गुरु नर्कुटकमिति। सप्त
भिर्दशभिश्च यतिः। मुनिगुहकार्णवैः कृतयतिं वद कोकिलकमिति। मुनयः सप्त गुहस्य स्कंदस्य कानि
मुखानि षट्। अर्णवाश्चत्वारस्तैः कृता यतिर्यत्र तन्नर्कुटकमेव कोकिलकं वद — इति शिष्योपदेशः॥
यतिभेदेन तस्यैवान्यासंज्ञेयं। तथा। रसयुगहयपुङ्क्तौ म्रौ स्लौ ल्गौ हि यदा हरिः। भवेत्कान्ता युगरसहयैर्य
म्नौ रसौ लगौ। सजसा भजगा गुरु दिक्स्वरैर्भवति चित्रलेखा। अत्र वृत्तसंख्या ९२१०७२॥ अथ धृतिः। स्या
द्भूतर्त्वश्वैः कुसुमितलतावेल्लिता म्तौ नयौ यो इति। भूतानि पंच ५ ऋतवः षट् ६ अश्वाः सप्त ७ तथा। म
तौ न्यौ भरसंयुतौ कर्ण ८ बाणा ५ कै ५ हरिणप्लुतं। यदि हि नयुगलं ततो वेदरेफैर्महामालिका। पंचभ ए.म.
कारकृताम्बं गतिर्यदि चांतरा निरता। सुयान कोस्तकैर्भवति अतुभिर्यो मोनसततसाः। तथा। षट्र्व ४२

रसाश्वैर्म्नजतनमकैः कीर्त्तिता चित्रलेखेयं। वसाश्वैस्तारा माद्यनना नसौ भमद पदकामिह समभिहितं
शार्दूलं वरमासषड्ढुयतिभिः सोजसौरोमश्चेत्। मासा द्वादश। अर्यपाश्वाश्वैर्मभनयरयुगैर्वृत्तमतं केसरं
अर्पश्रितारः म्रौ न्जौ भौ चेत्सलभिरमुदितं युगैर्मुनिभिः स्वरैः। अत्र वृत्तानि २६२१४२ अपाजिधृति १
॥१९॥ सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितमिति। द्वादशभिः सप्तभिश्च यति ४। तपानपुग
लगुरुर्निरंतरं यदा च चामरः॥ रसर्त्वश्वैर्य्म्रौ न्सौरर गुरुयुता मेघविस्फूर्जितस्यात्। भूताश्वाश्वांतं मतन
सतरगैः कीर्त्तितं पुष्पदाम। वृत्तबिंबाख्यं शारमुनितुरगैर्म्भौ न्सौ ततौ चेत्कृतः। इमं छायामारभ्यो ताक्रतुर
सहूपेर्योमनसाम्तोगुरुः। रसैः षड्भिर्लोकैर्यमनसजजागुरुर्मकरंदिका। इभाश्वैर्यौ यभनयजजगाः की
र्त्तिता मणिमंजरी। गजाब्धितुरगैर्जसौ जसतभागश्चेत्समुद्रतता। अत्र वृत्तानि ५२४२८८॥ अपकृति १
२० स्येयो सप्ताश्वषड्भिर्मरभनयमुता म्नौगः सुवदनेति। सप्तभिः सप्तभिः षड्भिश्च यतिः गौर न्नौ गंत्तौ
भवेदिह दशोनल्घ्स रौनवृत्तनाम। त्रिवारं रगणा जगौ रौ गुरुः लघुश्चेदेतादृशोनल्ग्स रौनवृत्तं नाम। गु

हलघुक्रमेणेस्य र्फः। अत्र पादांते यतिः॥ दृलोपे पूर्वस्य दीर्घो रपदिति त्रिरिस्य त्रदीर्घविधान पारसैरश्वैर श्वै
४२ र्ममननतगैर्गणानशोभेयमुक्ता। अत्र संख्या १०४८५७६॥ अथ प्रकृतिः २१॥ म्रभ्नैर्यानां त्रयेण त्रिमुनि
यतियुता स्रग्धरा कीर्तितेयमिति॥ मरभनैर्यगणत्रयेण नशोभेयमुक्ता॥ अत्र संख्या २०४७ समसमस
समसुवयतिमतीस्य र्फः। तपा। सलिलनिधिभिर्वेदैर्हनजौभभाणौ जगणात्रयश्वरः। अन्येषां मतेऽस्ति
द्रुमिति संस्तितमेतत्। अत्र संख्या २०९७१५२॥ अथ आकृतिः २२॥ मौनरनारनाव यगुरुर्दिग्वर्कविरमं हि
मद्रकमिदमिति। दिभुदशाश्वर्कैर्युद्वादशासु च विरमोविरतिर्यस्य तत्तथा। हीति प्रसिद्धं। तथा। सप्तभका
रलताः वसितौ सगुरुः कविभिः कथिता मदिरा॥ अत्र वृत्तानि ४१९४३०४॥ ॥ अथ विकृतिः २३॥ यदि
हनजौ भजौ भभलगास्तदश्वललितं हरार्कयतिमत्तरेति। हरा एकादश। अर्का द्वादश। मत्ताक्रीडा मौ लौ नौ
नलौ। तिभवतिवसुशरदशयतिपुते। वसवोष्टौ पंच दश च ते षु यति मती। अष्टमे पंचदशे च वर्णे यतिः कार्ये एम०
स्य र्फः। ननु पंचसु दशसु चेस्य र्फः। मत्ताक्रीडा मौ लौ नौ न्लौ गु वसु पंचदशका विति सूत्रे द्विवचननिर्देशा ४२

ता। अस्य पादे बहुवचनं स्यात्। अश्वैर्भवाजिवाहनमेतदुक्तं। अत्र संख्या। ८३८८६०८। अथ संकृतिः २४। अ
त्र मुनीनैर्यतिरिह भतना — भनयाश्च यदि भवति तन्वी। ति। भूतानि ये च। मुनयः सप्त। इनाः सूर्या द्वादश। अ
त्र पैंगले द्वादशसु द्वादशसु च यतिरुक्ता॥ अत्र संख्या १६७७७२१६॥ अथातिकृतिः २५॥ क्रौंचपदा। क्रौ
ञ्चौ नननौ न्याविषुशरवसुमुनिविरतिरिह भवेदिति। इषवः पंच। शराः पंच। वसवोऽष्टौ। मुनयः सप्त। एतेषु वि
रतिर्यस्याः सा तथा। अत्र संख्या ३३५५४४३२॥ अथोत्कृतिः २६। वस्वीशाश्वच्छेदोपेतं ममतनगनरस
लगैर्भुजंगविजृंभितमिति। वसवः ८ ईशाः ११ अश्वाः ७ एतैश्छेदैर्न यमायुक्तं। मीनाः षट्सलगा इति यदि
नकरसरसशरयतियुतमपवाहाख्यमिति। मः मगणः। षट्नाः नगणाः। सगणाः। गः गुरुः। पुनर्गुरुश्चानव
भिः षड्भिः पुनः षड्भिः पंचभिश्च यस्या युतमपवाहसंज्ञकं। अत्र वृत्तसंख्या ६७१०८८६४॥ ॥ इति वृ
त्तरत्नाकरटीकायामुक्तादिप्रकरणं॥ ॥ इदानीं समवृत्तप्रसंगेन समवृत्तरूपान्दंडकानाह। यदिह नयु
गलेन ततः सप्तरेफास्तदा चंडवृष्टिप्रयातो भवेद्दंडक इति। यदीति। पदे स्पष्टे। अर्थो हेतिप्रसिद्ध्यर्थेऽव्य पंच।

नयुग्मकं नगणाद्रूपं ततस्तदनंतरं सप्तरगणाः स चंडवृष्टिप्रपातो नाम दंडकः। इदमेवोदाहरणं यदि इयं चत्व
४४ रारात मीउव्यतिरिक्त पिंगलादिमते नंताभ्यां तेन तस्य संज्ञांतरमकारि। प्रतिचरणविवृद्धरेफाः स्युरर्णार्णव
व्यालजीमूतलीलाकरोद्दाम शंखादयः इति। यद्यपि प्रतिचरणं विवृद्धरेफो रगणो येषु ते त ये इति युक्तत्वात्प्र
थमे पादे नौ ततो द्वौ रेफा द्वितीयेन व तत्तीये दश चतुर्थे एकादशेति वृद्धिरित्यर्थः प्रतीयते तथापि इयं पी
तरविरोधात्प्रतिदंडकं चरणेषु विवृद्धरेफा येष्विति विग्रहेणोत्तरोत्तरदंडकेषु चरणचतुष्टयेपि एकैकरेफ
विवृद्धिरित्यर्थाश्रयणेन ग्रंथान्तराविरोधः कार्यः। ततश्च नाविवृद्धरेफास्युरर्णार्णवव्यालजीमूतली
लाकरोद्दामशंखादय इति। यद्यपि प्रतिचरणं विवृद्धरेफो रगणो येषु ते तथेति युक्तत्वात्प्रथमे पादे नौ
ततो द्वौ रेफा द्वितीयेन व तत्तीये दश चतुर्थे एकादशेति वृद्धिरित्यर्थः प्रतीयते तथापि इयं पीतरविरोधात्प्र
ति दंडकं चरणेषु विवृद्धरेफा येष्विति विग्रहेणोत्तरोत्तरदंडकेषु चरणचतुष्टयेपि एकैकरेफविवृद्धिरित्य एम०
र्थः प्रतीयतेन थापि ग्रंथांतराविरोधात्प्रतिदंडकं चरणे रावरोधः कार्यः। ततश्च नाम्नां रगणो यथा के ४४

नचवहितपादोसरिमोदंडकः । रगरानवके ऽर्णवः । दशभिर्व्याल ८ ।। एकादशभिर्जीमूतः । द्वादशभिर्ली
लाकरः । त्रयोदशभिरुद्दामः । चतुर्दशभिः शंखः । सर्वेप्यादौ नगणद्वयं कार्यं । आदिशब्दात्संचेदशादिरग
णैरारामासंग्रामासुसमावैकुंठ । सोत्कंठ । तारकासारं विस्तार । संहार नीहार । मंदार । केदार । साधार । सत्कार ।
संस्कार । माकंद । गोविंद । सानंद । संदोह । नंदरसेयमादिनामका एकैकरगणवृध्यानद्वपोत्तरैकत्रिंशद
धिकशततत्रपरगणघटितेकोनसहस्रा । क्षरपादपर्यंतकविप्रयोगानुसारेणदंडकास्तेपा ८ । मदकृः । ए
कोनसहस्राक्षरपर्यंतादंडकीयपः प्रोक्तः । वर्णात्रिकगणवृध्यानद्धितयाधामहामतिभि ८ रित्ति ।
तपाचरगणवृद्धितदंडकाः पंचविंशत्यधिकशतत्रयसंख्याका भवंति २१५ ॥ एवं यस्मादिवृद्धित
तदंडकः अपि । तत्ररीतिप्रदर्शनायाघोदाहरणं ममैव यथा । त्रिभुवनसुखहेतवेधातमुख्यामरप्रार्थनास
र्थनादर्थचिंतामणोदशरथकृतपागतोभागतस्तत्तनूजन्मतास्थापितश्रोतमार्गागजामुनिवनगत
तारकाकंटकीमूलकुद्दालितस्वीयबाणावलेराह्ववीकुशिकजयजिस्तिदुपेयोमकलतारेसेद्वंद्वपिप्र

घातोसिहंतुंरिपून्।एवमन्यानपि स्वयमुदाहार्याः॥ प्रचितकसमभिधो धीरधीभिः स्मृतो दंडको नद्वयादुत्तरैः सप्तभि
४५ र्यैरिति। नगणद्वयादुत्तरैः सप्तभिर्यैः यगणैः धीरबुद्धिभिः कविभिः प्रचितकसंज्ञको दंडक उक्तः।
प्रचितक इति समभिधा नाम यस्येति विग्रहः। अत्रापि पूर्ववदेकैकयगणवृद्ध्या दंडकाः कार्याः। यैरितु प
लक्षणं। अस्याभिरपि गणैः कविप्रयोगानुरोधाद्योगावल्लीविहारावल्यादिषु दंडकानामिषत्वात्। यद्यपि
शेषः प्रचित इति स्वतंत्रवृत्तिकृता रेफादिकादिरचितदंडकपरं शेषशब्दमंगीकृत्य रगणवृद्धितो नामैव
दंडकं चंडवृष्टिप्रयातो र्ध्वं भाविनां प्रचित इति सामान्यसंज्ञाभिधानार्थतया व्याख्यातं। अतएव हलायुधः। प्रथ
मतः पितदंडकश्चंडवृष्टिप्रयाताभिधानो मुनेः पिंगलाचार्यनाम्नो मतः। प्रचित इति सामान्यसंज्ञाभि
धानार्थतया व्याख्यातं। अतएव हलायुधः। प्रथमतः पितदंडकश्चंडवृष्टिप्रयाताभिधानो मुनेः पिंगलाचा
र्यनाम्नो मतः। प्रचित इति ततः परं दंडकानामियंजातिरेकैकरेफाभिवृद्ध्या यथेष्टं भवेत्। स्वरुचिरचि एप०
तसंतत्या तद्विशेषैरशेषैः पुनः काममन्येपि कुर्वंतु वागीश्वराः॥ भवति यदि समानसंख्याक्षरैस्तत्र ४५

पादश्चवस्यात्ततो दंडकः प्रच्यते सो जनैरितिरित्यपि यगणादिदंडकानामपि कविप्रयुक्तत्वादुक्तरगणादि
तरदंडकव्यतिरिक्तयादिकृतदंडकानामेव शेषशब्दोद्दिष्टानां प्रचितकसंज्ञाज्ञापनार्थं ततो सूत्रस्याभिप्रेत्य
व्याख्यात्रेतरकृतव्याख्यामनुसरतैवमवादि केचिदेतेरोत्यदोषः ॥ सर्वेषु दंडकेषु पादांते यतिः ॥ अत्र तिसौक
र्येणाव ॥ अन्येपि दंडका अन्यैरुक्ताः । यथा । नयुगयुगगुरुयुगावेवं प्रकाराः कवीच्छानुरोधात्तद्यपत्रव
ष्पंतएषोपरो दंडकः पंडितैरीरितः सिंहविक्रांतनामा ॥१॥ यत्ररेफान्कविः स्वेच्छया पाठसो भाग्यला
पि न्यसमारोपयत्येष धीरैः स्मृतो दंडको मत्तमातंगलीलाकरः ॥२॥ लघुगुरुः क्रमेण यत्र वध्यते सुधीभि
रिच्छया सदंडकस्त्वनंगशेखरः स्मृतः ॥३॥ स्वेच्छयां रजौ क्रमेण संन्निवेशयत्सुदारधीः कविः स दंडकः स्मृ
तो जगत्यशोकमंजरीति ॥४॥ तगणः सकलः खलु यत्र भवेत्तमिह प्रवदंति बुधाः कुसुमस्तवकं ॥५॥ य
कारैः कवीच्छानुरोधान्निबद्धैः प्रतिष्ठो विशुद्धोपरो दंडकः सिंहविक्रांतनामा ॥६॥ एवं मेघमजाकुसु
मस्तरणोत्तरकामबाणादयो दंडकाः षड्विंशत्यक्षराधिकाक्षरपादाः कविप्रबंधानुसारेण ज्ञेयाः ॥ षड्वि

शत्यक्षरम्छन्दस्तस्यांतुपूर्वोक्तासुजातिष्वेवांतर्भावोपपायोगंभवति॥ ॥इतिश्रीमद्भट्टरामेश्वरसूनुनारायण
४६ भट्टविरचितायांवृत्तरत्नाकरटीकायांवृत्तकौमुद्यांसमवृत्ताध्यायस्तृतीयः॥ ॥एवंसमवृत्तान्यभिधा
याधुनार्धसमान्याह। विषमेयदिसौसलगादलेभौयुजिभाद्गुरुकावुपचित्रमिति। विषमेदलेप्रथमेतृतीये
वपादेसौसगणद्वयंसलगाःसगणोलघुगुरवः। युजिसमेद्वितीयेचतुर्थेचपादेभौभगणौपुनर्भगणः
ततोद्वौगुरूतदोपचित्रंनाम॥ अर्धसमत्वाद्वृत्तीपादर्धमप्येवमेवोदाहार्यं॥ एवमग्रेपि। भत्रयमोजगतं
गुरुणीचेद्युजिनजौज्यपरौद्रुतमध्येति। ओजगतंविषमपादगतंभगणत्रयंगुरुणीचद्वेअग्रे। यु
जिसमपादेनयगणपरौनगणजगणौचेत्तद्रुतमध्यानाम॥ उपचित्रापातलिकापरांतिकेयं। सयुगा
त्सगुरुविषमेचेद्भाविहवेगवतीयुजिभाद्गावितिविषमेपादेसत्रयंगुरुश्चयुजिसमेपादेभगणत्रयं
गुरुद्वयंचेद्भवेदेहःशास्त्रेवेगवतीनाम। आपातलिकेवयं। ओजेतपरौजरौगुरुश्चेन्म्सौज्गौगुभद्रविराड्भवे ए४०
दनोजइति॥ ओजेविषमेपादेतगणस्तपरौजगणरगणौगुरुश्च। अनोजेसमेमसजगगुरवस्तद्भद्रविरा ४६

द्रुवेता। अथ पद्देशसिकस्यैवेयं गणनिवेश। विशेषसंज्ञा। असमे सजौ सगुरुयुक्तौ केतुमती समे भरनगा[illegible]द्गः
इति। विषमे दले पादे सजसागणागुरुश्च। समे भरनागणागुरुद्वयं केतुमती नाम। भरनगाद् इति समहारे द्व
न्द्वं। आख्यानकी तौ जगुरू ग ओजे जतावनोजे जगुरू गुरुश्चेत्। इति। तौ तगणौ। जगणो गुरुर्गुरुश्च ओजे वि
षमे पादे। अनोजे समे पादे जतजगगुरवश्चेत् आख्यानिकी नाम। जतौ जगौ गो विषमे समे चेत्तौ जौ ग एषा वि
परीतपूर्वेति। विषमे जतजगगुरवः। समे ततजगगुरवश्चेत् सा आख्यानकी विपरीतशब्दपूर्वा विप
रीताख्यानिकीत्यर्थः॥ अनयोरुपजात्यंतर्भावेपि विशेषसंज्ञाविधानार्थमर्धसमाध्याये पाठः। स
युगात्सलघू विषमे गुरु युजि नभौ भरकौ हरिणप्लुतेति। सगणद्वयात्सगणात् लघुगुरुश्च विषमे पादे।
युजि समे पादे नभभरागणास्तदा हरिणप्लुता नाम। अयुजि ननरलागुरुः समे नजमपरक्रमिदं ततौ व
जराविति। विषमे ननरलगुरवः। समे नजजराः। अपरवक्त्रं नाम। अस्य वैतालीयांतर्गतत्वेपि संज्ञांत
रविधानार्थमत्रोक्तिः। अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रेति। विषमे नयुगल

रेफयकाराः । युजि समे नजजरगुरवः स्युः । पुष्पिताग्रानाम । इयमप्यौपच्छंदसिकीतश्चैतेन विशेषतंत्रमि
४७ होक्ता । वदंत्यपरवक्त्राख्यं वैतालीयं विपश्चितः । पुष्पिताग्राभिधं केचिदौपच्छंदसिकं तथेति । विपश्चितः
पंडिताः अपरवक्त्राख्यं वैतालीयमेव वदंति । पुष्पिताग्राभिधं छंदश्चौपच्छंदसिकमेव केचिदाहुः । इदं च
स्वस्यापि संमतं । भावस्तूक्त एव । स्यादयुग्मके रजौ रयौ समे चेज्जरौ जरौ गुरुर्यवाद्यमती यमिति । वि
षमपादे रजरयाः समे जरजरगाः । यवाद्यवशाद्वा वासरामती यवमती स पर्वः । तथा । हे लिंगो विष
मे पादे समे जा गुरुर्ललिता सने ॥१॥ ओजे तपरौ जजरौ जगुरू समे रजौ म्पौ कीर्त्तिता बुधैरियं तु सं
पदाख्या । २ । रौ जरौ जसंयुतौ पदे पदे यं युग्मे तरौ जरौ गुरू मंगी यवाकौ ॥ ३ ॥ अयुजि ननरम्यास्तमे के
पि तु नयुगरयुगलं न यात्कौमुदी । ४ । यदि विषमे भवतो न जौ जरौ स जयाः समे जगुरू मंजुसौरभं । ५ । तथा ।
अष्टाविंशतिर्लघवः एको गुरुरिति विषमः पादः । त्रिंशल्लघव एको गुरुश्चेति समः । सा शिखा नाम । इय रत्न०
मेव विपर्यस्तपादा खञ्जा नाम । एते द्वे अपि द्विखंडकप्रकरणोक्तशिखाखञ्जयोश्छंदसोः सम्यक्ते ४७

रतामंगीकृत्यपपाङ्कतव्याख्यानेतदतिरिक्ते अत्रत्तेये। यदातस्मदुक्तप्रकारेणतत्रशकलशब्दं पादपर
माश्रितव्याख्या यतेतदातमैवैतयोरुक्तलक्षणान्नवक्तव्यतामवति॥ ॥इतिश्रीमद्भट्टरामेश्वरसूरि
सूनुनारायणभट्टविरचितायांवृत्तरत्नाकरव्याख्यायामवृत्तकौमुद्याख्यायामर्धसमाख्यश्चतुर्थः
॥ ॥अर्धसमान्यभिधायाधुनोद्देशक्रममनुसृत्यविषमवृत्तानिनिरूपयति। मुखपादोऽष्टभिर्वर्णैः प
रिस्फुरन्मकरालयैः क्रमाद्वृद्धैः४। सततंयस्यविचित्रैःपादैः संपन्नसौंदर्यंतदभिहितममलधीभिः पद
चतुरूर्ध्वाभिधंवृत्तमिति। यस्यवृत्तस्यमुखपादआद्यपादोवर्णाष्टकेनपरेद्वितीयाद्याः पादामकरालयैः
समुद्रैश्चतुर्भिरक्षरैः क्रमाद्वृद्धैः सततंनैरंतर्येणास्फुरत्तद्वृत्तंनिर्मलबुद्धिभिः पिंगलादिभिः पदचतुरू
र्ध्वाभिधमुदितमुक्तं। किंविशिष्टंतत्। विचित्रैर्विलक्षणैः पादैर्जनितंसौंदर्यंयस्यतादृशं। अत्रवर्णैरि
तिसंपन्नसौंदर्यमितिचवदतागुरुलघुनिवेशनियमोनास्तीति। ओतप्रोतसौभाग्यपर्यवसितवैचित्र्यं
विधेयमित्यस्यहृदि। प्रथमपादोऽष्टाक्षरो द्वितीयोद्वादशाक्षरः तृतीयः षोडशाक्षरश्चतुर्थोविंशत्यक्ष

४८

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४	
८	८	८	८	८	८	१२	१२	१२	१२	१२	१२	१६	१६	१६	१६	१६	१६	२०	२०	२०	२०	२०	२०	प्र
१२	१६	२०	१२	१६	२०	८	१६	२०	८	१६	२०	१२	८	२०	१२	८	२०	१२	८	१२	१६	१६	८	द्वि
१६	१२	१६	२०	२०	१२	१६	८	१६	२०	२०	८	८	१२	८	२०	२०	१२	१६	१६	८	८	१२	१२	तृ
२०	२०	१२	१६	१२	१६	२०	२०	८	१६	८	१६	२०	२०	१२	८	१२	८	८	१२	१६	१२	८	१६	च

रकार्यइतिफलितोर्थः। अत्रैवैकद्वित्रिचतुरंकानांपरस्परताडनेयापादानीपरिस्परसंकरेशंखवत्त्वक्रमगदा
पद्मानांपरस्परंसंकरेकेशवाधाईवेचतुर्विंशतिर्भेदाभवंति। तत्रप्रस्तारतोयथा। अत्रैकपंक्तिस्थितको
ष्ठकचतुष्टयस्थितीकसमानाक्षरक्रमिकपादेरेकैकोभेदोज्ञेयः। तत्रप्रथमभेदेमूलस्थितमुदाहरणं। द्वि
तीयेतुममैवयथा॥ लोभंलंभयविलयं ८ लाभाजाभावुभोभावयसमानूभवभीतः। १६। यत्तांकुरुजनं रम॰
गौरवमाचर १२ पदिनवा। मिनमुष्णिंषुलोकेयशोविशालमाशास्यस्यात्। २०॥ इदमेवोदाहरणंपादद्वय ४८

स्पेनेतरेषुद्वाविंशतिभेदेषुयोज्यं।एतस्यैवप्रतिपादमंतेगुरुद्वयनियमेसंज्ञांतरमाह।प्रथममुदितवृत्तैर्वि
रचित।विषमचरणभाजि।गुरुकयुगलनिधनइह सहित आऊ लेबुविरचितपदविततियतिरितिभवतिया
उइति।विरचितान्विषमान्विषमसंख्याकान्चरणान्भजति।एवंभूतेप्रथमोक्तेपदचतुरूर्ध्वाभिधेवृत्ते
इतिसर्वेनुवादः।गुरुयुग्मंनिधनेंतेयस्यतादृशेसतिस्वार्थेकः।इतीत्थंप्रकारआऊ उपसर्गेणसहितः
पीउआपीडोभवतीत्यर्थः।कीदृक्।लघुकृतपदरचनयाघटितयैस्मिन्॥अंतेगुरुद्वयस्यनियतत्वादितर
भागेलघुविरचितत्वं।अतसुखकरीचस्वेच्छयायतिःकार्येतिसूचनायचेतिग्रहणं।विशिष्यानुवादआपी
ड इत्येवपादेषुअंतेगुरुद्वयंकार्यंनतुततोतिरिक्तमितिसूचनार्थः।आपीडइतिसंज्ञायाछंदस्यप्रवेशा
दाऊसहितइत्युक्तिरीतिरिति।पूर्वोक्तरीत्यापीडेपिचतुर्विंशतिप्रकारेप्रथमभेदोदाहरणमिदं।आपीडए
वसमस्माप्रथमेकादशान्येदान्त्युत्याद्यव्युत्पादनायव्युत्पादूयति।प्रथमेतिग्निभिः४।प्रथमस्मितरचरणसमु
त्यैःत्रिपतिसयदिलआइलर।दितरगादितमपिमदिवतुर्थैश्चरणयुगलंकमविहृतमपरमितिकलिकासेति।

तुर्यशब्देनश्लोकचतुर्थांशः पादउच्यते। ततश्चप्रथमंतुर्यंप्रथमश्चरणः इतरचरणास्तुमुख्यंस्थानंतत्रद्वितीयचर
४९ णस्यपदेलक्ष्मलक्षणंश्रयति। अवलंबिताइतरतुर्यंद्वितीयपादः इतरगदितंस्वाव्यवहितप्रथमचरणगतंल
क्षणंश्रयति। अपरंचरणद्वयंतृतीयचतुर्थरूपंअविकलंयथावस्थितमित्येवंविधास्यस्यापीडएवसाप्रसि अ· २
द्धाकलिका। यद्वा। यआपीडः प्रथमेप्रथमस्थानेप्रथमपादेद्वितीयपादलक्षणंश्रयति। साकलिका। द्वादशा
